पक्षे वह्न्यादिभिः कलानामेकैकशः भक्षणेऽपि पुनः यज्ञशिष्टरूपामृतेनाप्यायते । यथोक्तं कालमाधवीये सोमोत्पत्तिवाक्येन "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः । विश्वे देवास्तृतीयान्तु चतुर्थीं सलिलाधिपः । पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः । सप्तमीमृषयो दिव्या अष्टमीमजएकपात् । नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम् । दशमीं पिबते वायुः पिबत्येकादशीमुमा । द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः । त्रयोदशीं धनाध्यक्षः कुवेरः पिबते कलाम् । चतुर्द्दशीं पशुपतिः पञ्चदशीं प्रजापतिः । निष्पीतस्य कलाशेषश्चन्द्रमा न प्रकाशते । कला षोड़शिका या तु सा त्वपो विशते तदा । अमायां तु सदा सोम ओषधीः प्रतिपद्यते । तमोषधिगतं गावः पिबन्त्यम्बुगतञ्च यत् । तत्क्षीरममृतं भूत्वा मन्त्रभूतं द्विजातिभिः । हुतमग्निषु यज्ञेषु पुनराप्यायते शशी । दिने दिने कलावृद्धिः पौर्णमास्यां तु पूर्णता" इति । यद्यपि ज्योतिषे कृष्णपक्षे सूर्य्यमण्डले प्रवेश एव उक्तस्तथापि तत्तद्दिवसे चन्द्रकलाभक्षणवत् वह्न्यादीनां तृप्तिरित्येतत्परत्वं सोमोत्पत्तिवाक्यस्य देवानाम् अस्मदादीनामिव भोजनस्यासिद्धेः तृप्तिमात्राधायकत्वेन तद्भोग्यत्वम् "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा० उ० उक्तेस्तथावगम्यते इत्यविरोधः । अनश्वरस्वरूपे विष्णौ: "अमृतांशोऽमृतवपुः" विष्णुस० ।

**अमृतवल्ली** स्त्री अमृता वल्ली । गुड़ूच्याम् (गुलञ्च) ।

**अमृतवाक्** त्रि० अमृतमिव वाको वचनं यस्य । १अमृततुल्यवचने "अमृतवाका वयसां सा क्षिप्रश्येनं जनयति" शत० ब्रा०

**अमृतसंभवा** स्त्री अमृतैव सम्भवति सम् भू+अच् । गुड़ूच्याम् (गुलञ्च) ।

**अमृतसंयाव** न० अमृतमिव स्वादु संयावम् । पक्वान्नभेदे । "पचेत् घृतोत्तमे तप्ते न्यसेत् पक्वं नवे घटे । ततो मरिचचूर्णेन खण्डचूर्णावचूर्णितम् । कुर्य्यात् कर्पूरसंयुक्तं संयावममृतोपमम् । संयावममृतस्वादु पित्तघ्नं मधुरं स्मृतमिति भा० प्र० ।

**अमृतसार** पु० अमृतस्य दुग्धस्य सारः । घृते । चक्रदत्तोक्ते अयःपाकभेदे यथा "लोहस्य पाकमधुना नागार्ज्जुनशिष्टमभिदध्मः ॥ लोहारकूटताम्रजकटाहे दृढ़मृण्मये प्रणम्य शिवम् । तदयः पचेदचपलः काष्ठेन्धनेन वह्निना मृदुना ॥ निक्षिप्य त्रिफलाजलमुदितं यत्तत् घृतञ्च दुग्धञ्च । संचाल्य लौहमय्या दर्व्या लग्नं समुत्पाद्य ॥ मृदुमध्यखरभावैः पाकस्त्रिविधोऽत्र वक्ष्यते पुंसाम् । पित्तसमीरणश्लेष्मप्रकृतीनां मध्यमस्य समः ॥ अभ्यक्तदर्विलोहं सुखदुःखस्खलनयोगि मृदु मध्यम् । उज्झितदर्वि खरं परिभाषन्ते केचिदाचार्य्याः ॥ अन्ये विहीनदर्व्वीप्रलेपमाखुत्कराकृतिं ब्रुवते । मृदुमध्यमर्द्धचूर्णं सिकतापुञ्जोपमन्तु खरम् ॥ त्रिविधोऽपि पाक ईदृक् सर्वेषां गुणकृदेव न तु विफलः । प्रकृतिविशेषे सूक्ष्मौ गुणदोषौ जनयतीत्यल्पम् ॥ विज्ञाय पाकमेवं द्रागवतार्य्य क्षितौ क्षणान् कियतः । विश्राम्य तत्र लोहे त्रिफलादेः प्रक्षिपेच्चूर्णम् ॥ यदि कर्पूरप्राप्तिर्भवति ततो विगलिते यदुष्णत्वे । चूर्णीकृतमनुरूपं क्षिपेन्न वा न यदि तल्लाभः ॥ पक्वं तदयःसारं सुचिरघृतस्थित्यशाविरुद्धत्वे । गोदोहनादिभाण्डे लौहभाण्डाभावे सति स्थाप्यम् । यदि तु परिप्लुतिहेतोर्घृतमौचित्याधिकं ततोऽन्यस्मिन् । भाण्डे निधाय रक्षेद्भाव्युपयोगो ह्यनेन महान् ॥ अयसि विरुक्षीभूते स्नेहस्तिलघृतेन सम्पाद्यः । एतत्ततो गुणोत्तरमित्यमुना स्नेहनीयं तत् ॥ अत्यन्तकफप्रकृतेर्भक्षणमयसोऽमुनैव शंसन्ति । केवलमपीदमशितं जनयत्ययसो गुणान् कियतः ॥ अमृतसारः" चक्र० द० ।

**अमृतसारज** पु० अमृतादिव स्वादोः सारात् जायते जन—ड ५त० । १गुड़े रा० नि० ।

**अमृतसू** अमृतं दीधितिरूपमाप्ययनं सूते सू—क्विप् । चन्द्रे । अमृतान् देवान् सूते । देवमातरि स्त्री ।

**अमृतसोदर** अमृतस्य सोदर एकत उत्पन्नत्वात् । उच्चैःश्रवसि अश्वे । तस्यामृतमथने समुद्रादुत्पन्नत्वात् तथात्वम् । "सुरा देवी समुत्पन्ना तुरगः पाण्डरस्तथा" भा० आ० प० । तज्जातीयत्वात् घोटकमात्रे राजनि० ।

**अमृतस्रवा** स्त्री० अमृतमिव स्रवति स्रु—पचाद्यच् । १ रुदन्तीलतायाम् । भावे अप् ६त० । २ अमृतनिष्यन्दे पु० ।

**अमृतांशु** पु० अमृतमिवाप्यायकः अंशुरस्य । चन्द्रे ।

**अमृतांशूद्भव** पु० अमृतांशोश्चन्द्रस्योद्भवो यस्मात् । विष्णौ "अमृतांशूद्भवो भानुः" वि०स० । ५त० चन्द्रोद्भवे त्रि० ।

**अमृतान्धस्** पु० अमृतमन्धोऽन्नमिव दर्शनात् तृप्तिकरमस्य । अमृताशने देवे तेषाममृताशनञ्च दर्शनमात्रेण "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" श्रुतेः । तेषां तत्पानकथा "ततस्तदमृतं देवो विष्णुरादाय वीर्य्यवान् । जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः । ततो देवगणाः सर्व्वे पपुस्तदमृतं समम्" भा० आ० प० ।

**अमृताफल** न० अमृतायाः फलम् । पटोले द्रव्याभि० ।

**अमृतायमान** त्रि० अमृतमिवाचरति अमृत+क्यङ् शानच् ।